## अचि शीर्षः। (६२/१६६७)

अजादौ तद्धिते[1] शिरसः [2]शीर्षशब्दः आदेशो भवति। हस्तिशिरसः अपत्यं [3]हास्तिशीर्षिः। 'बाह्वादिभ्यश्च' (४.१.९६/१०९६) इति इञ्। स्थूलशिरसः इदं स्थौलशीर्षम्। शीर्षन्भावे हि 'अन्' (६.४.१६७/११५५) इति प्रकृतिभावः स्यात्। हास्तिशीर्षिशब्दात् स्त्रियामिञोऽणिञोरनार्षयोः (४.१.७८/११९८) ष्यङादेशे कृते शीर्षस्य शिरःशब्दग्रहणेन ग्रहणात् शीर्षन्नादेशः प्राप्नोति। तत्र [4]प्रकृतिभावे सति हास्तिशीर्षण्या इत्यनिष्टं रूपं स्यात्। इष्यते [5]तु हास्तिशीर्ष्या इति। तत् कथम्? कर्तव्योऽत्र यत्नः। अणिञन्ताद् वा परः प्रत्ययः ष्यङाश्रयितव्यः, तत्र यस्येति लोपस्य स्थानिवद्भावाद् व्यवधानम्॥

## पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु। (६३/२२८)

पाद दन्त नासिका मास हृदय निशा असृज् [6]यूष दोष यकृत् शकृत् उदक आसन इत्येतेषां शब्दानां स्थाने शस्प्रभृतिप्रत्ययेषु परतः पद् दत् नस् मास् हृद् निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् इत्येते आदेशाः यथासङ्ख्यं भवन्ति।

पद् – [7]निपदश्चतुरो जहि। [8]पदा वर्तय गोदुहम्। 'पादः पत्' (६.४.१३०/४१४)। दत् – 'या दतो [9]धावते तस्यै श्यावदन्' (तै. सं. २.५.१.७)। नस् – 'सूकरस्त्वा खनन्नसा' (अ. वे. २.२७.२)। 'मास् – [10]मासि (तै. सं. २.५.६.६) त्वा पश्यामि चक्षुषा। हृद् – 'हृदा [11]पूतं मनसा जातवेदो' (अ. वे. ४.३९)। निश् – अमावास्यायां निशि (खि. २.१.८) यजेत्। असन् – असिक्तोऽस्ना (मै. सं. ३. १५. ८)ऽवरोहति। यूषन् – 'या पात्राणि यूष्ण आसेचनानि' (ऋ. १.१६२.१३)। दोषन् – यत्ते दोष्णो (मै. सं ३.१०.३) दौर्भाग्यम्। यकन् – [12]यक्नोऽवद्यति। शकन् – [13]शक्नो(अ. वे. १२.४.४)ऽवद्यति। उदन् – '[14]उद्नो दिव्यस्य नो देहि' (तै.सं. २.४.८.२)। आसन् – आसनि (ऋ. १.७५.१) किं लभे मधूनि। शस्प्रभृतिषु इति किम्? पादौ ते [15]प्रतिपीड्यौ। नासिके ते कृशे। [16]केचिदत्र छन्दसि इत्यनुवर्तयन्ति। अपरे पुनरविशेषेणेच्छन्ति। तथा हि भाषायामपि पदादयः शब्दाः प्रयुज्यन्ते।

व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः॥

इत्येवमादयः। अन्यतरस्याम् इत्येतदनुवर्तयन्ति। [17]तेन पादादयोऽपि [18]प्रयुज्यन्ते। शस्प्रभृतिषु इति प्रकारार्थे प्रभृतिशब्द इति '[19]शला दोषणी' (काठ. सं. १६.२१) इत्यत्रापि दोषन्नादेशो भवति।

[६६८] पदादिषु मांस्पृत्स्नूनामुपसङ्ख्यानम्। (म. भा. ३.४१)

मांस पृतना सानु इत्येतेषां स्थाने यथासङ्ख्यम् मांस् पृत् स्नु इत्येते आदेशाः भवन्ति। 'मांस्पचन्या उखायाः' (ऋ. १.१६२.१३)। मांसपचन्या इति प्राप्ते। 'पृत्सु मर्त्यम्' (ऋ. १. २७.७)। पृतनासु मर्त्यम् इति प्राप्ते। 'न ते दिवो न पृथिव्या अधिस्नुषु' (वा.सं.१७.१४)। अधिसानुषु इति प्राप्ते।

---

1. परतः इत्यधिकम् ङ. फ. 2. शब्दः नास्ति ग. फ. 3. हास्तिशीर्षः क. 4. प्रकृतिवद्भावे क. 5. तु नास्ति क. 6. यूषन् दोषन् फ. 7. द्विपदः क. ग. फ. ह. 8. पदे रति यशोधनं क. 9. धावति इति मुद्रितः पाठः. 10. मासि त्वं पश्यसि क. 11. पूतेन मनसा जातवेदसम् मुद्रितः पाठः. 12. यक्नाराध्यति क. 13. शक्नेऽवविविक्षति क. 14. उद्नो दिव्यस्य नावा ते मुद्रितः पाठः. 15. संप्रतिपीड्यौ ग. 16. केचित्तु क. 17. तेन नास्ति फ. 18. हि इत्यधिकम् क. 19. शिलादोषणी क.